# શ્રીલક્ષ્મીવેઙ્કટેશ્વરભુજઙ્ગસ્તોત્રમ્

Shri Lakshmivenkateshvara Bhujanga Stotram

sanskritdocuments.org

December 17, 2018

# Shri Lakshmivenkateshvara Bhujanga Stotram

# શ્રીલક્ષ્મીવેઙ્કટેશ્વરભુજઙ્ગસ્તોત્રમ્

## Sanskrit Document Information

Text title : Lakshmivemkateshvara Bhujanga Stotram

File name : lakShmIveMkaTeshvarabhujangastotram.itx

Category : vishhnu, venkateshwara, bhujanga

Location : doc_vishhnu

Author : jagguru singarayyaNgara

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran psaeaswaran at gmail.com

Latest update : December 17, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 17, 2018

*sanskritdocuments.org*

# શ્રીલક્ષ્મીવેઙ્કટેશ્વરભુજઙ્ગસ્તોત્રમ્

ભુજઙ્ગાચલાગ્રસ્થહેમાલયાન્ત-
    સ્થલન્નીલરત્નત્રિશાવિદ્ગ્રહેણ ।
મુહુર્ભાસયન્તં સુખાન્તં મહાન્તં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૧॥

સ્ફુરદ્રત્નભાસ્વત્કિરીટાભિરામં
    લલાટસ્થકર્પૂરચૂર્ણોર્ધ્વપુણ્ડ્રમ્ ।
મનાઙ્મન્દહાસાધરોષ્ઠાસ્યપદ્મં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૨॥

કૃપાપૂર્ણસૌમ્યેક્ષણાબ્જાવલોકૈઃ
    નતાનેકભૂતૌહરક્ષૈકદીક્ષમ્ ।
મણિસ્થોમકાન્તિચ્છટાકર્ણપૂરં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૩॥

કરાગ્રોલ્લસચ્છઙ્ખચક્રાયુધાઢ્યં
    રમાવાસરમ્યાયતૂરઃ પ્રદેશમ્ ।
લસત્પીતવાસઃ પ્રભારઞ્જિતાઙ્ગં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૪॥

અનર્ઘસ્ફુરદ્રત્નભૂષાવિશેષૈઃ
    અનેકૈસ્સદાલઙ્કૃતં મઙ્ગલાઙ્ગમ્ ।
સુગન્ધિપ્રસૂનાવલિ સ્રક્સુરમ્યં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૫॥

પદાબ્જં શ્રયધ્વં મમેત્યાદરેણ
    બ્રુવાણં સ્વભક્તાન્ કરન્યાસભઙ્ગ્યા ।
જગજ્જન્મરક્ષા ક્ષયાદિસ્વલીલં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૬॥

ભવાબ્ધિર્ભવેદ્યાનુદગ્ધં શ્રિતાનાં
    નિતિવ્યાહરન્તં કરેણાપરેણા ।
ધૃતાર્ચાવતારં પરમ્બ્રહ્મનિત્યં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૭॥

પદાબ્જાશ્રિતાનેકદેવાધિપાનાં
    કિરીટસ્થરત્નપ્રભાભાસિતાઙ્ઘ્રિમ્ ।
ત્રિલોકૈકનાથં ત્રયીમૌલિવેદ્યં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૮॥

ધનં ભક્તલોકૈરનેકૈર્ગૃહીત્વા
    તદીયાં સમસ્તાં વિપત્તિં નિવાર્ય ।
અભીષ્ટાનિ દત્વા સર્વાનવન્તં
    ભજે વેઙ્કટેશં શ્રયે શ્રીનિવાસમ્ ॥ ૯॥

નમઃ શ્રીનિવાસાય સર્વાન્તરાત્મં
    નમસ્તેઽસ્તુ પદ્માવતીવલ્લભાય ।
નમો વેઙ્કટાદ્રિસ્ફુરત્કાલમેઘ
    પ્રપન્નાર્તબન્ધો નમસ્તેઽસ્તુ નિત્યમ્ ॥ ૧૦॥

ઇતિ શ્રીજગ્ગુરુ સિંગરય્યઙ્ગરવિરચિતં
    શ્રીલક્ષ્મીવેઙ્કટેશ્વરભુજઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by Malleswara Rao Yellapragada, PSA Easwaran

---

*Shri Lakshmivenkateshvara Bhujanga Stotram*
pdf was typeset on December 17, 2018

Please send corrections to *sanskrit@cheerful.com*